भावः कारणमादाय वा यस्य । अन्यं प्रति पूर्व्वभावे ज्ञाते यत्पूर्व्वभावविज्ञानम् ॥ जनकं प्रति पूर्व्ववर्त्तितामपरिज्ञाय न यस्य गृह्यते । अतिरिक्तमथापि यद्भवेन्नियतावश्यक-पूर्व्वभाविनः ॥ एते पञ्चान्यथासिद्धा दण्डत्वादिकमादि-मम् । घटादौ, दण्डरूपादि द्वितीयमपि दर्शितम् ॥ तृतीयन्तु भवेद् व्योम कुलालजनकोऽपरः । पञ्चमो रास-भादिः स्यादेतेष्वावश्यकस्त्वसौ" इति ॥

**अन्यथासिद्धि** स्त्री अन्यथा अन्यप्रकारेण सिद्धिः । अन्य-प्रकारेण सिद्धौ न्यायाद्युक्तकारणताप्रतिबन्धकरूपे पञ्च-विधे दोषे च ।

**अन्यदर्थ** पु० अन्योऽर्थः कर्म्म० दुक् । भिन्नार्थे । ६त०३त० वा अन्यार्थः अन्यस्यान्येन वाऽर्थे पु० । अन्यः अर्थोयस्य अन्यार्थः भिन्नार्थके त्रि० । "अन्यार्थ उपन्यास इति"

**अन्यदा** अव्य० अन्यस्मिन् काले दा । अन्यस्मिन् काले इत्यर्थे "अन्यदा भूषणं पुंसां क्षमा लज्जेव योषितामिति" माघः

**अन्यदाशा** स्त्री अन्या आशा दुक् । भिन्नप्रार्थने । अन्य-स्याशा ६त० । अन्यस्य वाञ्छायाम् अन्यलाभाशये ।

**अन्यदाशिस्** स्त्री अन्या आशीः दुक् । अन्याशीर्वादे अन्यस्य अन्येन वाशीरिति ६त०३त० वा । अन्या-शीरित्येव । अन्यस्य अन्येन वाऽशास्यप्रार्थने ।

**अन्यदास्था** स्त्री अन्यस्मिन् आस्था दुक् । अन्यस्मिन्नास्थायाम् अन्यस्यास्था ६त० । अन्यास्थेत्येव अन्यस्यास्थायाम् ।

**अन्यदास्थित** त्रि० अन्यमास्थितः दुक् । अन्यरूपास्थिते ३त० । अन्यास्थित इत्येव अन्येनास्थिते ।

**अन्यदीय** त्रि० अन्यस्यायम् गहा०छ दुक् च । अन्यसम्बन्धिनि

**अन्यदुत्सुक** त्रि० अन्यस्मिन् उत्सुकः दुक् । अन्य-विषयोत्कण्ठिते । अन्येन उत्सुकः ३त० । अन्योत्-सुक इत्येव तत्रैवार्थे त्रि० ।

**अन्यदूति** स्त्री अन्या ऊतिः दुक् । अन्यरक्षणे । अन्यस्य ऊतिः ६त० । अन्योतिरित्येव अन्यस्य रक्षणे ।

**अन्यद्राग** पु० अन्यस्मिन् रागः दुक् । अन्यविषयरागे । अन्येन अन्यस्य वा रागः ३त०६त० वा । अन्यराग इत्येव अन्यकरणके अन्यसम्बन्धिनि च रागे ।

**अन्यपुष्ट** पुंस्त्री० अन्यया नात्मभिन्नया पुष्टः सर्वनाम्नो वृत्तौ पुंवद्भावः । कोकिले "अप्यन्यपुष्टाः प्रतिकूलशब्दाः श्रोतर्वितन्त्रीरिव ताड्यमानेति" कुमा० । "बलिपुष्ट-कुलादिवान्यपुष्टैरिति" माघः ।

**अन्यपूर्व्वा** स्त्री अन्यः पूर्व्वो यस्याः । पूर्व्वपतिमरणादौ पश्चात् क्षतवाक्षिन्नपतिकायां पुनर्भूस्त्रियाम् । अन्यपूर्व्वा च सप्तविधाः यथोक्तं नारदेन "परपूर्व्वाः स्त्रियस्त्वन्याः सप्त प्रोक्ता यथाक्रमम् । पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्व्विधा । कन्यैवाक्षतयोनिर्या पाणिग्रहण-दूषिता । पुनर्भूः प्रथमा प्रोक्ता पुनःसंस्कारकर्म्मणा । देशधर्म्मानवेक्ष्य स्त्री गुरुभिर्या प्रदीयते । उत्पन्नसाहसान्यस्मै सा द्वितीया प्रकीर्त्तिता"।(उत्पन्नसाहसा उत्पन्नव्यभिचारा) । "असत्सु देवरेषु स्त्री बान्धवैर्या प्रदीयते । सवर्णाय सपि-ण्डाय सा तृतीया प्रकीर्त्तिता" । स्त्री प्रसूताऽप्रसूता वा पत्यावेव तु जीवति । कामात्समाश्रयेदन्यम्प्रथमा स्वैरिणी तु सा । कौमारम्पतिमुत्सृज्य या त्वन्यं पुरुषं श्रिता । पुनः पत्युर्गृहं यायात्सा द्वितीया प्रकीर्त्तिता । मृते भर्तरि तु प्राप्तान् देवरादीनपास्य या । उपगच्छेत्परं कामात्सा तृतीया प्रकीर्त्तिता । प्राप्ता देशाद्धनक्रीता क्षुत्पिपासातुरा तु या । तवाहमित्युपगता सा चतुर्थी प्रकीर्त्तिता इति" । अन्या अपि सप्तविधाः कात्यायनेन दर्शिता यथा "सप्त पौनर्भवाः कन्या वर्जनीयाः कुला-धमाः । वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला । उद-कस्पर्शिता या च या च पाणिगृहीतिका । अग्निं परिगता या च पुनर्भूप्रभवा च या । इत्येताः काश्यपेनोक्ता दहन्ति कुलमग्निवत्" इति । अन्यपूर्व्वाविदनञ्च युगान्तरविषय-मिति माधवाचार्य्यादयः "नष्टे मृते प्रव्रजिते क्लीवे वा पतिते पतौ । पञ्चस्वापत्सु नारीणां पतिरन्योविधीयते पराशरवाक्यस्य तेन युगान्तरविषयकत्वस्य व्यवस्थापनात् । कलियुगेऽपि तत्कर्त्तव्यतेति आधुनिकामन्यन्ते तत्र बला-बले तत्तद्ग्रन्थे एवावगन्तव्ये । अन्यस्वामिकमात्रेऽपि "मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः । तथाप्यनन्य-पूर्व्वेव तस्मिन्नासीत् वसुन्धरेति रघुः । ततः अर्शआदित्वादच्, अन्या पूर्व्वा यस्य वा । तत्परिणेतरि पुनर्भूपतौ पु० ।

**अन्यभाव** पु० अन्यरूपो भावः । अन्यरूपभवने अन्यरूप-चित्तभावे च । आ० ष्यञ् । आन्यभाव्यं तद्भावे न० ।

**अन्यभृत्** पुंस्त्री०अन्यया भ्रियते भृ-कर्म्मणि क्विप् । कोकिले ।

**अन्यभृत** पुंस्त्री० अन्यया भृतः पुष्टः । कोकिले । "कलमन्य-भृतासु भाषितमिति" रघुः । अन्यपुष्टमात्रे त्रि० ।

**अन्यमनस्** त्रि० अन्यस्मिन् मनोयस्य । स्थयाहृतविषयपरि-हारेण उत्कण्ठया व्याकुलीभावेन अन्यत्रासक्तचित्ते । वा कप् । अन्यमनस्कोऽप्यत्र त्रि० ।

**अन्यमातृज** पु० अन्यस्या मातुर्जायते जन ड ५त० पुंवद् ।